**SHARADA** (A Peer-Reviewed Journal), [Vol. 1, No. 2, Whole No. 2, June 2026], ISSN: 3102-0658 (P)

# ब्रह्माद्वैतवादेऽज्ञानस्वरूपविमर्शः


**कमलः सुवेदी**

*उपप्राध्यापकः, ने.सं.वि., महेश-संस्कृत-गुरुकुल-विद्यापीठम्*

Subedik39@gmail.com

https://orcid.org/0009-0001-3440-9862


https://doi.org/10.3126/srj.v1i2.99123


**शोधसारः**

*उपनिषत्सु प्रतिपादितो दर्शनसिद्धान्त एव ब्रह्माद्वैतवादः। वेदोपनिषद्ब्रह्मसूत्रगीतापुराणानां यत् सत्यं यद् हार्दं तदेव नवनीतवद् भगवता शङ्कराचार्येण स्थापितोऽयं दर्शनसिद्धान्तः। वेदोपनिषदादीनां व्याख्यातॄणां भिन्नभिन्नदृष्टिभाक्त्वादनेके सिद्धान्ता द्वैताद्वैतविशिष्टाद्वैतादिनामानो वेदान्तदर्शनजगति स्थापिताः सन्ति। सर्वेषां दार्शनिकानां विचारे द्वैतगन्धो नैव सर्वथापाकृतोऽस्तीति पश्यन्तो मनीषिणः शाङ्करमद्वैतमेवोपनिषत्सिद्धान्तसारतया मन्यन्ते। बहुषु विद्याकेन्द्रेषु शाङ्कराद्वैतवादस्यैव स्वीकारो दृश्यते। भगवता गौडपादाचार्येण विकासमुपनीतस्य ब्रह्माद्वैतवादस्यैतस्यैव प्रशिष्याचार्येण शङ्करेण सुव्याख्यातः सुप्रचारितः प्रतिष्ठापितश्च विश्वस्मिन्नपि विश्व इति। तदनुसारं ब्रह्म सत्यं जगन्मिथ्या ब्रह्मैव परमार्थसत्यं तच्च सच्चिदानन्दस्वरूपं सर्वथानवच्छिन्नमपरिमितं चिन्मात्रं मायोपाधिवशादेव सृष्ट्यादिकर्तृत्वेनजीवेश्वरजगद्रूपेण चावभासते। वस्तुतस्तु जगज्जीवेश्वरादयः स्वप्नदृष्टवस्तुजालवदसत्यभूता एव। समुदिते ज्ञाने त्वेकमेवापरिमितं चिन्मयं ब्रह्मावशिष्यतेऽयमेव ब्रह्माद्वैतवादः। अस्मिन् सिद्धान्तेऽज्ञानस्वरूपं कीदृगिति विषयमुपालम्ब्यालेखोऽयं विकासं नीतो वर्तते। भौतपुस्तकालयतः साञ्जालिकपुस्तकालयतश्च सामग्रीसङ्कलनं विधाय विषयविश्लेषणं कृत्वाऽऽलेखोऽयं सज्जीकृतोऽस्ति। अत्र नूतनः सिद्धान्तः प्रतिपादितो नास्ति, अपि तु विदुषां पूर्वस्थापिताः सिद्धान्ताः विश्लिष्टाः सन्तीत्यालेखोऽयं निगमनात्मको विद्यते। अत्राद्वैतवादिभिर्विद्वद्भिरनेकैः प्रतिपादिता अज्ञानसम्बद्धसिद्धान्ता विश्लेषणपद्धत्या उपस्थापिताः सन्ति। सर्वेषां मतविश्लेषणानन्तरं वस्तुतोऽज्ञानस्य स्वरूपं कीदृशमस्तीति निष्कर्षोऽत्रोपस्थापितो विद्यते।*


**शब्दकुञ्जी** : अद्वैतवादः, अविद्या, ज्ञानविरोधि, अनिर्वचनीयम्, अध्यासः।

## विषयपरिचयः

अखिलजगति सर्वेऽपि प्राणिनः सुखमेव वाञ्छन्ति। तदवाप्तये दुःखनिवृत्त्यर्थं च प्रतिक्षणं सर्वात्मना प्रयतन्ते। तन्निवृत्तये तन्मूलकारणस्यान्वेषणं कार्यम्। किमस्य मूलकारणम्? का चास्य प्रकृतिः? कीदृशश्चेतनाचेतनयोः सम्बन्धः? इति प्राथम्येन ज्ञातव्यमन्यथा मानवो हृदयपरितापजनकं प्रियविप्रयोगजन्यमप्रियसंयोगजन्यं वा दुःखं लभत एव। अस्य प्रहाणाय वेदान्तशास्त्राध्ययनमेवावश्यकमिति नाविदितं शेमुषीजुषाम्। वेदान्तदर्शनं नाम सर्वेषु दर्शनेषु दर्शनीयतमं दर्शनमिति वर्वर्ति सर्वोपरि। 'ईशावास्यमिदं सर्वम्' (ई.उ. १), प्रज्ञानं ब्रह्म'(ऐ.उ. ५/३) , 'अयमात्मा ब्रह्म'(बृ.उ.

२/५/१) , 'सत्यं ज्ञानमनन्तं ब्रह्म'(ऐ.उ. २/१/१)इत्यादीनि श्रुतिवचनानि अन्यानि स्मृतिगीतावचनानि ब्रह्मसूत्रवाक्यानि च जगति दरीदृश्यमानानां सर्वेषामपि वस्तूनामद्वैतत्वं प्रतिपादयन्ति। तच्चात्मैकत्वविज्ञानादेव सम्भवति। संसरावस्थायामज्ञानस्य विद्यमानत्वात् तेन चात्मैकत्वस्य तिरोहितत्वान्नैवाद्वैतत्वं सम्बोभूयते। तच्चाज्ञानं स्वरूपतिरोधानपूर्वकं विविधविचित्रविक्षेपकरं सदसदनिर्वचनीयमनादि च। अज्ञानविगलिता एव नैकविधासु पुण्यपापजनिकासु योनिषु निरता जरारोगशोकबन्धनजन्ममरणादिवन्तो वयं संसारसागरे बम्भ्रम्यमाणा इतस्ततो निमज्जामः । इमामेव दुर्दर्शनीयामवस्थां दृष्टिगोचरीकृत्य भगवान् शङ्कराचार्यः श्रुतिशिरोभूताभ्य उपनिषद्भ्योऽद्वैतामृतं दुदोहेत्यत्र नास्ति कश्चित् शङ्कापङ्कलेशः । एतेन प्रतिष्ठापितो वाद एव ब्रह्माद्वैतवादः ।

अज्ञानवादः शाङ्करवेदान्तस्य प्रमुखसिद्धान्तो वर्तते। जगदुदयरक्षाप्रलयानां कार्यकारणभावस्य विवर्तवादादिमहत्त्वपूर्ण सिद्धान्तस्य च विवेचनेऽयं वादोऽत्यन्तमुपयोगी भवति। अद्वैतवेदान्तचिन्तनस्य मूलाधाररूपेण वादोऽयं राजते। वेदान्तग्रन्थेषु चाज्ञानस्य नामधेयानि बहूनि प्राप्यन्ते। अविद्या-अव्यक्त-प्रकृति-मिथ्याज्ञान-मिथ्यात्व-विपर्यय-मोह-अग्रहणादिनामभिरभिधीयते। विशेषरूपेण मायाविद्याज्ञानान्येव नामधेयानि प्रसिद्धानि सन्ति। कतिपयैराचार्यैर्मायाज्ञानयोर्वैभिन्नं स्वीकृतमस्ति। अस्य च मायावादस्य प्रतिष्ठायै शङ्कराचार्यस्य भूमिका महत्वपूर्णा वर्तते। वैदिकसाहित्येषु शङ्करपूर्ववर्त्याचार्यग्रन्थेषु चास्याज्ञानवादस्य बीजं लभ्यते। ऋग्वेदस्य भास्यकारेणाचार्येण सायणेन मायाशब्दस्य निर्वचनमित्थं कृतमस्ति –'मिमीते जानीते, कर्म मीयतेऽनयेति वा माया' (ऋ.वे. सायणभाष्यम्, ३/२७/७)। येन ज्ञानं लभ्यते कर्मविधानस्य परिज्ञानञ्च प्राप्यते तदज्ञानमिति। निघण्टुकारेण यास्केन मायाशब्दस्यार्थः प्रज्ञा कृतास्ति (निघण्टुः, १/६/४)। अवास्तविकासत्यत्वादेनां मायेति कथयन्ति। सा च ब्रह्मणः शक्तिर्मायाप्रकृत्यादिशब्दव्यपदेश्या भावाभावविलक्षणा तत्त्वातत्त्वाभ्यामनिर्वचनीया ब्रह्मणो भिन्नवाभिन्नत्वाभ्याञ्चानिरूपणीया त्रिगुणात्मिका जगन्मूलभूता चास्ति। सृष्टेः प्रारम्भिकावस्थावर्णने 'नासदासीन्नो सदासीत्तदानीम्' (ऋ.वे., १०/११९/१)। इदमेव चिन्तनं स्वीकृत्य दर्शनक्षेत्रे दार्शनिकैः सत्कार्यासत्कार्यानिर्वचनीयादिवादाः संस्थापिताः प्रतिपादिताश्च। अकल्पनीयवस्तूत्पादने कारणशक्तिरूपेणाज्ञानस्य परिभाषा यजुर्वेदस्य भाष्ये महीधरेण विहितास्ति (य.वे. महीधरभाष्यम्, ११/६९)। सृष्टेरुत्पादिकाशक्तिरूपेण प्रतिपादनमथर्ववेदे विहितमस्ति (अ.वे. ८/१०/२२)। श्रुतिस्मृतिपुराणादिषु चास्य चर्चा बह्वी दृश्यते। अज्ञानस्यानादित्वानिर्वचनीयत्वभावरूपत्वानि तत्र तत्र सम्बद्धग्रन्थेषु प्रतिपादितानि सन्ति। तान्येव पर्यालोच्याज्ञानस्वरूपमत्र प्रतिपाद्यते।

अद्वैतवेदान्तदर्शने मूलं तत्त्वमज्ञानमस्ति। सकलप्रपञ्चस्य मूलकारणमज्ञानमेव। इदञ्च नैसर्गिकं मिथ्याप्रत्ययरूपं कर्तृत्वभोक्तृत्वप्रवर्तकञ्चास्ति। अज्ञानस्य विषये तत्तच्छास्त्रेषु महच्चिन्तनं विहितमस्ति। अस्मिन्नध्ययने शास्त्रेष्वज्ञानस्वरूपनिर्धारणेन, अज्ञानस्य जगन्मूलकारणत्वप्रतिपादनेन, वेदान्तेऽज्ञानस्योपयोगकारणेन च सम्बद्धा विषयाः समाधेयत्वेनोद्देश्यीकृतानि सन्ति। दुःखस्यात्यन्तिकी निवृत्तिः परमानन्दस्य प्राप्तिरेव मुक्तिरिति वेदान्तदर्शनस्य राद्धान्तः। अज्ञानोच्छेद एव मुक्तिः। मोक्षप्रतिबन्धकस्याज्ञानस्य सर्वाङ्गीणपरिचय एवास्योद्देश्यम्।

प्रकृतशोधनिबन्धे उद्देश्यप्राप्तये गुणात्मकविश्लेषणात्मकविधिद्वयस्य प्रयोगो विहितोऽस्ति। शोधस्यास्य लेखनपरम्परा प्राथमिकद्वितीयकस्रोतोभ्यां सामग्रीसङ्कलनपूर्वकं निर्धारितास्ति। प्राथमिकस्रोतोरूपेण चोपनिषद्भगवद्गीताब्रह्मसूत्रशाङ्करभाष्यादयो वेदान्तसम्बद्धग्रन्थाः स्वीकृताः सन्ति। द्वितीयकस्रोतांसि पाश्चात्यविद्वद्भिर्भारतीयमनीषिभिश्च विरचिता व्याख्याग्रन्थाः, शोधपत्रिकाः, पूर्वकृताध्ययनानि च।विविधैर्विद्वद्भिः प्रतिपादितानां सिद्धान्तानां समालम्बनेन विषयप्रतिपादनमन्वेषणात्मकशैल्या विहितं वर्तते। तथैवाद्वैतवेदान्तसम्बद्धं शास्त्रीयग्रन्थादिकमधीत्य प्रतिपाद्यविषयाणां चर्चा विहितास्ति। पूर्वकृताध्ययनानामपि सहाय्यं स्वीकृत्य सलक्षणं विषयविश्लेषणं विहितमस्ति। सङ्कलितानां सामग्रीणां शास्त्रीयपद्धत्या वेदान्तराद्धान्तानुसारं सप्रमाणं व्याख्यानमुपस्थापितं वर्तते।आधुनिकयुगे भौतिकसुखसाधनानां प्रचुरतायां सत्यामपि मानव आन्तरिकशान्तिविमुखो दृश्यते। मानसिकविक्षेपभ्रमावसादादयः समाजं बाधन्ते। एतादृश्यामस्वस्थस्थितावद्वैतवेदान्तस्य साधनप्रक्रिया दार्शनिकसिद्धान्तेन सह व्यावहारिकजीवनपद्धतिरूपेणापि परमोपकारिका सिद्ध्यति। अयं शोधो जिज्ञासूनां कृतेऽज्ञानस्य यथार्थावबोधे स्पष्टं सोपानमार्गं प्रस्तौति।अज्ञानतत्कार्यविज्ञाने सरलरूपेण तदुपायान् ज्ञापयति। तेनायमालेखो वेदान्तविज्ञानानुरागिणामनुसन्धातॄणां कृते पाथेयभूतो भवति।अयमालेखो मुख्यतोऽद्वैतवेदान्तदर्शनस्य सिद्धान्तेष्वेव सीमितोऽस्ति। अतोऽत्र द्वैत-विशिष्टाद्वैत-शुद्धाद्वैतादिदर्शनानां साधनप्रक्रियाणां विस्तरेण विचारो नैव विहितोऽस्ति।अज्ञानस्य स्वरूपचिन्तनपराणामाचार्याणामेवाभिमतानां समालोडनमत्र विहितमस्ति।

**अज्ञानस्वरूपम्**

अज्ञानशब्दे प्रयुक्तस्य नञो विरोधार्थो विद्यते न त्वभावार्थः। अज्ञानस्य भावरूपत्वात्। अध्यासो विवर्तश्चाविद्यैव सिद्यति। सा च विशुद्धसत्त्वप्रधानतया माया मलिनसत्त्वप्रधानतयाविद्येत्युच्यते। अस्मिन्मते मायाविद्ययोर्वास्तविको भेदो न मन्यते। मायोपाधिक आत्मेश्वरः, अविद्योपाधिको जीवः। इदमित्थंरूपेणापरिभाषेयत्वात्, यत्किञ्चिदितिरूपेणाज्ञानं विद्वांसः प्रतिपादयन्ति। केचन शेमुषीजुषो ज्ञानस्याभाव एवाज्ञानमिति सङ्गीरन्ते। तर्ह्यज्ञानस्यास्तित्वं प्रमाणैः साधयितुं शक्यम् ? इति जिज्ञसा समुदेति। अज्ञानसत्तां प्रतिपादयन् सदानन्दः श्रुत्यनुभवप्रमाणानि प्रस्तौति। वेदान्तदर्शने तथान्यदर्शनेषु च शब्दानुमानार्थापत्त्यादिप्रमाणैरज्ञानस्यास्तित्वं प्रतिपादयन्ति। आकारशून्यस्याज्ञानस्य प्रमाणविज्ञानं प्रदीप्ततेजसा दीपेन तमोदर्शनवद् हास्यास्पदं भवतीति मन्यते। उक्तञ्च –

*अज्ञानं ज्ञातुमिच्छेद्यो मानेनात्यन्तमूढधीः।*
*स तु नूनं तमः पश्येद् दीपेनोत्तमतेजसा॥ (वे.सि.मु. १२५)*

प्रमाणैरप्रतिष्ठापिते सत्यविद्याया अविद्यात्वमिति सुरेश्वराचार्यस्याभिमतम्। यथोक्तम् –

*अविद्याया अविद्यात्वमिदमेव तु लक्षणम्।*
*यत्प्रमाणसहिष्णुत्वमन्यथा वस्तु सा भवेत्॥ (बृ.भा.वा. १२१)*

अघटितघटनापटीयस्या मायाया दुर्घत्वं भूषणत्वेन स्वीकृतमस्ति न तु दूषणत्वेन। उक्तञ्च –

*दुर्घटत्वमविद्याया भूषणं न तु दूषणम् ।*

*कथञ्चिद् घटमानत्वेऽविद्यात्वं दुर्घटं भवेत् ॥ (इ.सि. १/१४०)*

अज्ञानस्यास्तित्वं श्रुतिप्रमाणाधारेण साधयितुं शक्यम् । उक्तञ्च –

*ते ध्यानयोगानुगता अपश्यन्*

*देवात्मशक्तिं स्वगुणैर्निगूढाम् ।*

*यः कारणानि निखिलानि तानि*

*कालात्मयुक्तान्यधितिष्ठत्येकः ॥ (श्वे.उ. १/३)*

अज्ञानं खलु मायाविद्याव्यक्ताकाशाव्याकृताक्षरप्रकृत्यादिभिर्नामभिरपि ज्ञायते। वेदोपनिषत्सु चाज्ञानशब्दस्य प्रयोगो यत्र तत्र दृश्यते। कठोपनिषदादिषु ज्ञानविरोधित्वेनाज्ञानशब्दस्य प्रयोगो विहितः। अज्ञानशब्दश्च 'न ज्ञानमिति अज्ञानम्' इति नञा सिद्ध्यति। सामान्यतो नञषडर्था भवन्ति -

*तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता*

*अप्राशस्त्यं विरोधश्च नञर्थाः षट्प्रकीर्तिताः ॥ (नागेशः, परमलघुमञ्जूषा, निपातार्थप्रकरणम्)*

अत्र चाज्ञानशब्दो नञो विरोधवाचकत्वे विनियोगः, न त्वभावार्थेऽज्ञानस्य भावरूपत्वात्। प्रतीतिश्चाहमज्ञ इत्याद्यनुभवात् सम्भवति। ज्ञाननिवर्त्यत्वाच्च नञो विरोधार्थत्वम्। सदानन्दः स्वकीये वेदान्तसारग्रन्थेऽज्ञानमित्थं परिभाषते - अज्ञानं सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् (सदानन्दः, सन् १९९८, वेदान्तसारः, पृ. १४)। अज्ञानस्वरूपविमर्शे चानिर्वचनीयत्वादीनां विश्लेषणमावश्यकमिति धिया तेषां चर्चा क्रियतेऽत्र।

## अनिर्वचनीयत्वम्

अज्ञानस्य सदसद्विलक्षणत्वादनिर्वचनीयत्वं शास्त्रेषु प्रतिपादितं दृश्यते। अज्ञानं न सद् वर्तते नासद् न सदसद्रूपं चास्ति। अत एतद्रूपेभ्यः सर्वेभ्यो विलक्षणत्वादनिर्वचनीयमिति। एतस्य सद्रूपत्वे स्वीकृते ब्रह्मणः समानसत्ताकत्वादुयोर्नित्यत्वाच्च द्वैतापत्तिः। नाप्यसद् वन्ध्यापुत्रवत् प्रतीतेरभावः।व्यावहारिकदशायां प्रपञ्चप्रतीतिस्तु भवत्येव। अहमज्ञः, अहं न जानामि, इत्याद्यनुभववाक्यैस्तत्प्रतीतिस्तु भवत्येव। अतः सदसद्विलक्षणत्वादज्ञानस्यानिर्वचनीयत्वं युक्तिसङ्गतं सङ्गच्छते।

अज्ञानमनिर्वचनीयमिति शङ्करानुयायिनः स्वीकुर्वन्ति। आचार्यः शङ्करः स्वीयप्रकरणग्रन्थेषु चाज्ञानस्य आनादित्वमनिर्वाच्यत्वं प्रतिपादयति - 'अनाद्यविद्यानिर्वाच्यकारणोपाधिरुच्यते' (आत्मबोधः, १४)। अज्ञानं न सद् नासद् न च सदसद्रूपम् अत एवानिर्वचनीयमिति ब्रह्माद्वैतवादिनः कथयन्ति। अनिर्वचनीयत्वे च शङ्कराचार्यस्योद्घोषो विवेकचूडामणौ -

सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।

साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा॥ (विवेकचूडामणिः, १११)

अनिर्वचनीयस्य परिभाषां तत्त्वप्रदीपिकाकारश्चेत्थं कुरुते -

प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं न यत्।

गाहते तदनिर्वाच्यमाहुर्वेदान्तवेदिनः ॥ (चित्सुखाचार्यः, वि.सं. २०४४, तत्त्वप्रदीपिका, पृ. २०६)

इदं निश्चयमेव न सदूपं भवति नासद्रूपं भवति न चोभयात्मकमपि भवितुं शक्नोति , इत्यतोऽज्ञानस्यानिर्वचनीयत्वं सिद्धमेव। पञ्चदशीकारेणापि अस्यानिर्वचनीयत्वं स्वीकृतं दृश्यते। शङ्करोत्तरवर्तिनो ब्रह्माद्वैतवादिन आचार्या अपि अज्ञानस्यानिर्वचनीयत्वं निर्बाधं मन्यन्ते। अद्वैतश्रुतेः नानात्वश्रुतेश्च परस्परविरोधात् तत्परिहारार्थमज्ञानस्याभ्युपगमस्यावश्यकत्वात् तस्यानिर्वचनीयत्वं मिथ्यात्वञ्च शङ्कराचार्येण स्वीकृतमस्ति - अव्यक्ता हि माया तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्। अज्ञानस्यानिर्वचनीयत्वात् तत्कल्पितं जगदपि अनिर्वचनीयमेवेति तस्योद्घोषः। चित्सुखाचार्य मधुसूदनसरस्वत्यादयोऽपि अर्थापत्तिप्रमाणद्वारास्यानिर्वचनीयत्वं साधयन्ति। विमतं सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत बाध्यते प्रतीयतेऽपि तस्माद् सदसद्विलक्षणत्वात् अनिर्वचनीयमिति (मधुसूदनः, सन् १९७८, अद्वैतसिद्धिः, पृ. ४३)। एवमेव प्रतिशास्त्रमनुमानेनापि अज्ञानस्यानिर्वचनीयत्वं प्रतिपादयन्ति अद्वैतमतानुयायिनः।

## ज्ञानविरोधित्वम्

अज्ञानशब्दस्य न ज्ञानमित्यज्ञानमिति रूपेण विग्रहः क्रियते। अत्र नञ्शब्दस्य विरोधार्थकत्वं नत्वभावार्थकत्वम्। अत एवाज्ञानलक्षणे ज्ञानवरोधिशब्देन ज्ञानापनोद्यत्वं सूचितं भवति। नैष्कर्म्यसिद्धिकार आचार्यसुरेश्वरोऽप्यज्ञानस्य ज्ञानविराधित्वमेव मन्यते। अज्ञानस्य ज्ञाननिवर्त्यत्वाद् ज्ञानप्रकाशे समुदिते अज्ञानतमो विनश्यति। उक्तञ्च सुरेश्वराचार्येण –

सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी।

सहते न विचारं सा तमो यद्वद्दिवाकरम्॥ (नैष्कर्म्यसिद्धिः ३/३६)

अज्ञानमित्यत्र नञो विरोधार्थ एव न तु ज्ञानाभावः। विद्वन्मनोरञ्जनीकारोऽपि अज्ञानस्य ज्ञानापनोद्यत्वं स्वीकुरुते (वे.सा., विद्वन्मनोरञ्जनी, पृ.८६)।श्रीकृष्णेन चात्मसाक्षात्कारे कृतेऽस्य निवृत्तिर्भवतीति भगवद्गीतासु प्रतिपादितम् (भ.गी. ७/१४)। ज्ञानविरोधित्वमज्ञानमित्यत्र ज्ञानस्य विरोधी , ज्ञानं विरोधि यस्य इति विग्रहद्वयमस्माकं समक्षं समुपतिष्ठते। आत्मतत्त्वसाक्षात्कारे बाधामुपस्थापयतीत्यज्ञानं ज्ञानविरोधि। विहिते तत्त्वसाक्षात्कारे ज्ञानस्य निवृत्तिर्भवतीति विग्रहद्वयप्रतिपादितार्थः सङ्गच्छत एव।

## त्रिगुणात्मकत्त्वम्

अज्ञानस्यापरं स्वरूपं खलु त्रिगुणात्मकत्वम्। अज्ञानस्यानिर्वचनीयत्वे सर्वथैवाज्ञायमानत्वं स्यादिति शङ्का तु भवत्येव। त्रिगुणात्मकत्वे स्वीकृते न कापि शङ्केति विदुषामभिप्रायः। सत्त्वरजस्तमोगुणैर्युक्तमिदं त्रिगुणात्मकत्वमिति कथ्यते। एतस् त्रिगुणात्मकता श्रौतस्मार्तवाक्यैः सिद्ध्यति।'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे.उ. १/३)इति श्वेताश्वतरोपनिषदि त्रिगुणात्मकत्वस्य प्रतिपादनात्। युक्त्या चाज्ञानस्य त्रिगुणात्मकत्वं साधयितुं

शक्यते। कार्ये ये गुणा दृश्यन्ते ते कारणेऽपि विद्यन्ते। अज्ञानजन्यतेजोऽबन्नेषु लोहितशुक्लकृष्णगुणा विद्यन्ते। उक्तञ्च –'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' (छा.उ. ६/४/१)। अज्ञानकार्येषु लोहितशुक्लकृष्णत्वात्मकं त्रिगुणात्मकत्वं दृश्यते चेदज्ञानस्यापि त्रिगुणात्मकत्वं तु सिद्धमेव। त्रिविधैः सत्त्वतमोरजोरूपैर्गुणैर्युक्तत्वात् अस्य त्रिगुणात्मकत्वम्। गुणगुणिनोरभेद इति युक्त्याऽपि त्रिगुणात्मकत्वं सुस्पष्टं भवति। श्रीमद्भगवद्गीतायामपि गुणमयत्वं प्रदर्शितमस्ति - 'दैवी ह्येषा गुणमयी मम माया दुरत्यया' (भ.गी. ७/४)।

**भावरूपत्वम्**

अद्वैतपक्षपातिन आचार्या अद्वैतवेदान्तानुसारमज्ञानस्य भावरूपत्वं प्रतिपादयन्ति। अज्ञानस्य भावरूपत्वेऽद्वैतिनो विविधप्रमाणानि प्रदर्शयन्ति। शाङ्करसिद्धान्तानुसारमज्ञानं निश्चप्रचं भावरूपमेव। परमेश्वराधीना काचन मायाशक्तिरवश्यमेवाभ्युपगन्तव्या। यतो हि तया विना जगत्स्रष्टृत्वं परमेश्वरस्य नैव सेत्स्यति। सा च न स्वतन्त्रा 'तदधीनत्वादर्थवद्' (ब्र.सू. १/४/३)इति ब्रह्मसूत्रे मायायाः पारतन्त्र्यं स्पष्टतया सूचितमस्ति। मायापरपर्यायभूताज्ञानस्य भावरूपत्वेन स्वीकारः शङ्कराचार्येण विहितः - 'सा चावश्याभ्युपगन्तव्या अर्थवती हि सा न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति .... अविद्यात्मिका हि सा बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुषुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः' (ब्र.सू. शां.भा. १/४/३)। अज्ञानस्य भावरूपत्वं प्रत्यक्षानुमानश्रुत्यर्थापत्तिप्रमाणैः सिद्ध्यति। 'अहमज्ञः''मयि ज्ञानं नास्ति' इति युक्त्याज्ञानस्य भावरूपत्वं सिद्ध्यति। तत्राहमज्ञ इत्यस्याज्ञानवान्नहमित्यर्थः। तच्चाज्ञानं भावरूपं नत्वभावरूपम्। अभावस्यानुपलब्धिप्रमाणगम्यत्वान्न प्रत्यक्षविषयत्वम्। कथञ्चिच्च नैयायिकस्य मतरीत्या तस्य प्रत्यक्षविषयत्वाभ्युपगमेऽपि नोपदर्शितानुभवे ज्ञानाभावो विषयः। अज्ञानस्य भावरूपत्वे साक्षिवेद्यत्वाद् भूतले घटो नास्तीत्यस्मिन् प्रत्यक्षे भावरूपमज्ञानमेव विषयः। न तु ज्ञानाभावः। तस्य च भावरूपत्वमात्मतत्त्वसाक्षात्कारपर्यन्तमेव तिष्ठति। यथोक्तम् –

अनादिभावरूपं यद्विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते॥ (चित्सुखी १/९)

सद्रूपेणात्मना मिथ्याज्ञानस्य प्रतीतिर्भवति चेत्तेनैवाज्ञानस्य प्रतीतिरपि सम्भवा। सुरेश्वराचार्येणोक्तञ्च –

मिथ्याज्ञानस्य वस्तुत्वं येनैव स्यात् सदात्मना।
अज्ञानस्यापि तेनैव सत्यत्वं केन वार्यते॥ (बृ. भा. वा. १/४/४४२)

प्रत्यक्षात्मानुभवेन भावरूपत्वस्याज्ञानस्य प्रत्यक्षवेद्यत्वम्। अस्यार्थोऽज्ञानवानहमिति भवति। तच्चाज्ञानं भावरूपं नत्वभावरूपमिति। शङ्कराचार्यस्य मतेऽपि भावरूपमेवाज्ञानम्। यद्यप्यज्ञानपदोच्चारणसमकालमेवापाततो ज्ञानस्याभाव एवाज्ञानमिति प्रतीयते तथापि नाभावादभावोत्पत्तिरिति न्यायेनास्मितारागद्वेषादीनामज्ञानकार्याणामभावादुत्पत्त्यसम्भवमभ्युपगम्यास्य भावरूपत्वमेव स्थिरीभवति। अत एव सङ्क्षेपशारीरककारः कथयति -

नाभावतास्य घटते वरणात्मकत्वाद् नाभावमावरणमाहुरभावशौण्डाः।

अज्ञानमावरणमाह च वासुदेवस्तद्भावरूपमिति तेन वयं प्रतीमः ॥ (सर्वज्ञात्ममुनिः, सन् २००७, सङ्क्षेपशारीरकम् १/३२०)

आवरकत्वादभावरूपत्वं नैव सङ्घटतेऽज्ञानस्य। यतो ह्यावरणं तु भावेनैव सम्भवति। तथा ज्ञानं चाज्ञानमावृणोतीति गीतायां श्रीकृष्णेन न्यगादि(भ.गी. ५/१५)। इतोऽपि अज्ञानस्य भावरूपत्वं सुस्पष्टं भवति।

अर्थादुत्पन्ने ज्ञानेऽज्ञानं विलीयतेऽत इदं भावरूपमनादि चेति। नासदीयसुक्तावद्वैतसिद्धान्तानुसारमज्ञानस्य भावरूपत्वं प्रतिपादितमस्ति (ऋ.सं. १०/१२९/३)। आश्रयविषयज्ञानानि चैकेनैव साक्षिणा भासितानि भवन्ति। आश्रयविषयौ साधयन्नयं साक्षी तद्वदेवाज्ञानमपि प्रकाशयति। अज्ञाननिवर्तकं त्वन्तःकरणवृत्तिज्ञानमेवेति विवरणप्रमेयकारेण विद्यारण्येनापि भावरूपत्वं समर्थितं दृश्यते (विद्यारण्यः, सन् १९६६, विवरणप्रमेयसङ्ग्रहः, पृ.५५)। अज्ञानस्याभावरूपत्वे तु जगत उपादानकारणमेव न स्यात्। श्रुतिस्मृतिपुराणानि च जगत उपादानत्वमज्ञाने साधयन्ति। 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे.उ.१/३) , 'मायां तु प्रकृतिंविद्याद्' (पूर्ववत् ४/१०)इत्यादिवचनैश्च जगदुपादानकारणमज्ञानमिति प्रतिपादितं वर्तते। अतोऽप्यज्ञानस्य भावरूपत्वमेव सिद्ध्यति न त्वभावरूपत्वमिति ब्रह्माद्वैतराद्धान्तः।

चित्सुखाचार्येनानुमानं च प्रदर्श्यैतस्य भावरूपत्वं स्फुटीकृतं वर्तते। तथा हि विवादाध्यासितं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमप्रकाशितार्थप्रकाशकत्वादन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति। अपरञ्च – विगीतं देवदत्तनिष्ठप्रमाणज्ञानं देवदत्तनिष्ठप्रमाभावातिरिक्तानादेर्निवर्तकं प्रमाणत्वाद्यज्ञदत्तादिगतज्ञानवदिति (चित्सुखी १/१०)। अत्र प्रमाणज्ञानस्य ज्ञानप्रागभावनिवर्तकत्वं सिद्धमेवेति तत्साधने सिद्धसाधनरूपदोषः स्यादिति साध्यकोटौ स्वप्रागभावव्यतिरिक्तेति विशेषितम्। वार्तिककारः सुरेश्वराचार्यश्चाविद्यां तमोरूपेण स्वीकुरुते परन्तु तमसो भावरूपत्वं नैव मनुते। तथाप्यविद्यां भावरूपेणैव स्वीकुरुते न तु ज्ञानाभावरूपेण। अज्ञानरूपत्वेऽप्यविद्याया ज्ञानाभावव्यापकत्वात् (बृ.उ.सं.वा. १८३) । पद्मपादाचार्येणाप्यविद्याया भावरूपत्वं लक्षितं वर्तते (तै.उ.भा.वा.ब्र. १७९)। सर्वज्ञात्ममुनिना मृषापदार्थरूपेणाज्ञानस्य स्वरूपं प्रतिपादितमस्ति। आत्मनो ज्योतिस्वरूपमाच्छाद्य विपरीतं विविधप्रपञ्चभावं प्रदर्शयति। उक्तञ्च –

आच्छाद्य विक्षिपति संस्फुरदात्मरूपं
जीवेश्वरत्वजगदाकृतिभिर्मृषैव।
अज्ञानमावरणविभ्रमशक्तियोगा-
दात्मत्वमात्रविषयाश्रयताबलेन। (सं.शा. १/२०)

प्रकटार्थकारो ज्ञानाभावरूपामविद्यां तिरस्कुरुते। भावरूपतां संसाध्याज्ञानस्य चानिर्वाच्यतां प्रस्तौति। प्रकाशात्मना च पञ्चपादिकाविवरणेऽज्ञानस्य भावरूपत्वसाधनाय प्रत्यक्षानुमानार्थापत्तिप्रमाणानि प्रस्तुतानि सन्ति। उक्तञ्च –'प्रत्यक्षं तावदहमज्ञो मामन्यञ्च न जानामीत्यपरोक्षावभाषदर्शनात्। ननु ज्ञानावभाषविषयोऽयमवभाषः ? न,

अपरोक्षावभाषत्वादहं सुखीतिवत्' (पं.पा.वि., पृ. ७४)। वाचस्पतिमधुसूदनसरस्वत्यादिभिः प्रभृतिभिः स्वकीये ग्रन्थे प्रत्यक्षानुमानागमार्थापत्तिप्रमाणैरविद्याया भावरूपत्वं प्रतिपादितमस्ति।

यथा दिवान्धो दिनेऽपि यत्किञ्चिदन्धकारस्वरूपं स्वीकुरुते तथैवाज्ञानस्यापि यत्किञ्चिद्रूपत्वं भवति। अस्य स्वरूपं भावरूपत्वानिर्वचनीयत्वज्ञानविरोधित्वादिरूपम्। एनत् सद्रूपेणासद्रूपेण नोभयरूपेणापि प्रतिपादयितुमशक्यत्वाद् यत्किञ्चित्त्वमुरीकरणीयमेव।

**अज्ञानभेदः**

इदं चाज्ञानं समष्टिव्यष्टिभेदेन द्वैविध्यमाप्नोति। यद्यपि वेदान्तदर्शनदृष्ट्याज्ञानमेकमेव तथापि समष्ट्यभिप्रायेण चानेकत्वं भजते। यथा बहुवृक्षसमूहो वनमिति निगद्यते चेदेकैकाभिप्रायेण व्यष्टिरूपेण परिगणिते सति पिप्पलाम्रादिनामभिर्बहुषु रूपेष्वभिधातुं शक्यते। अन्तःकरणोपाधिप्रभावेण नानारूपेण प्रतीयमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेणाज्ञानस्यैकत्वं प्रतिपद्यते। श्वेताश्वतरोपनिषद्युक्तं यत् –

अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः
अजो ह्येको जुषमाणोऽनुषेते
जहात्येनां भुक्तभोजात्मजोऽन्यः ॥ (श्वे.उ. ४/५)

उत्कृष्टोपाधितया विशुद्धसत्त्वप्रधानं भवति। एतदुपहितं चैतन्यमीश्वर इत्युच्यते जगत्कारणत्वात् सर्वेश्वरत्वात् सकलाज्ञानस्य प्रकाशकत्वाच्च। इदं च सर्वोपरमत्वात् स्थूलसूक्ष्मप्रपञ्चलयस्थमखिलकारणत्वाच्च कारणशरीरमुच्यते। नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्टिरूपेण अजामेकामित्यादिश्रुतेश्च एकत्वव्यपदेशः (सदानन्दः, सन् १९९८, वेदान्तसारः, पृ.१६)। नानाजीवगताज्ञानस्य व्यष्टिरूपेण विवक्षायामनेकमज्ञानमिति व्यवह्रियते। इदञ्चाज्ञानस्य व्यष्टित्वमनेकत्वं वा श्रौतवचनानुमोदितं वर्तते। उक्तञ्च –'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ.वे. ६/४७/१८)। परमेश्वरश्च व्यष्टिभूताज्ञानोपाधिद्वारा बहुरूपो भवति। इदमेव सत्यं समर्थयन् व्यष्टिरूपाज्ञानं वर्णितमस्ति – 'इयं व्यष्टिर्निकृष्टोपाधितथा मलिनवत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकज्ञानावभाषकत्वात्' (वे.सा., विद्वन्मनोरञ्जनी, पृ. ९३)। अज्ञानस्य व्यष्टित्वञ्च निकृष्टोपाधितया मलिनसत्त्वप्रधानत्वाच्च सिद्ध्यति। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादि गुणत्वात् प्राज्ञ इत्युच्यते। इदमपि समष्टिवत् सर्वोपरमत्वात् सर्वप्रपञ्चलयस्थानमिति बुद्ध्यते। अहंकारादिकारणशरीरत्वात् कारणशरीरञ्चोच्यते। इन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतेश्च व्यष्ट्यज्ञानमनेकत्वमिति (सदानन्दः, सन् १९९८, वेदान्तसारः, पृ.१९)।आवरणविक्षेपशक्तिभेदेनाज्ञानस्य शक्तिद्वयं वरीवर्ति। आवरणशक्तिर्वस्तुनः सत्यस्वरूपमाच्छादयति। विक्षेपशक्तिश्च पारमार्थिके वस्तुनि नामरूपात्मकानि मिथ्यारूपाण्युत्पादयति। सीमितावरणशक्तिरसीमितमात्मानमावृणोति। उक्तञ्च –

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं

यथा मन्यते निष्प्रभं चातिमूढः ।

तथा बद्धवद्धाति यो मूढदृष्टेः

स नित्योपलब्धिस्वरूपोहमात्मा ।। (हस्तामलकः १०)

अज्ञानं स्वावृतात्मनि विक्षेपशक्त्या भूतभौतिकसृष्टिमुद्भावयति। एतस्याः शक्तेर्मुख्यं कार्यं ब्रह्मण आरभ्य पिपीलिकापर्यन्तं स्थूलब्रह्माण्डजगतो विरचनम् । आब्रह्मस्तम्बपर्यन्तस्य चराचरात्मकस्य जगत उत्पादनम् । उक्तञ्च-

विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत् । (वा.सु. १३)

अस्य चाश्रयो जीवो वर्तते चेद् विषयश्च शुद्धं ब्रह्मेति समेषामद्वैतपक्षपातीनामाचार्याणामभिमतम्। उक्तञ्च सर्वज्ञात्ममुनिना –

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।

पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ।। (सं.शा. १/३/१९)

एवमज्ञानस्य भावरूपत्वज्ञानविरोधित्वानिर्वचनीयत्वादिस्वरूपविज्ञानं भवति। समष्टिव्यष्टिभेदेन भेदद्वयप्रदर्शनपूर्वकमज्ञानस्यावरणविक्षेपशक्तिद्वयस्य सम्यक् प्रतिपादनं विहितम् ।

## निष्कर्षः

सर्वप्रपञ्चकारणभूतमिदमज्ञानं ज्ञानविरोधित्वादुदिते रवौ यथान्धकारविनाशस्तथैवोदिते ज्ञाने सत्यज्ञाननाशः। जगत्कारणमिदमज्ञानं नाभावरूपम्। न किञ्चिदवेदिषमित्येतेन सौषुप्तानुभवेन चाज्ञानस्याभावरूपत्वं खण्डितं भवति। यतो ह्यनुभवोऽयमभावरूपो मन्येत तर्ह्यभावज्ञानायानुयोगिप्रतियोगिज्ञानमप्यपेक्षते। परन्तु सर्वमेतन्नात्र सम्भवति। तथैव त्वदुक्तमर्थं न जानामि , अहमज्ञः इत्यादिना जाग्रत्कालीनव्यवहारेण चाज्ञानस्याभावरूपत्वमपाक्रियते। एवञ्च नासदासीन्नो सदासीत्तम आसीत् (तैत्तिरीयसंहिता २/८/९/३) श्रुतिरियं सर्वप्रथमं नासदासीदिति कथनेनाभावव्यावर्तनपूर्वकं तम आसीदेतेनाज्ञानस्य भावरूपतां व्याहरति। अज्ञानं च मूलाविद्यातूलाविद्याभेदेन द्विविधमङ्गीकृतं वर्तते। समग्रस्य व्यावहारिकस्य प्रपञ्चस्य परब्रह्मणि विभ्रमकारणरूपमज्ञानं मूलाविद्या प्रातिभासिकपदार्थानां कारणरूपञ्च तूलाविद्येति ।दर्शनमिदं जगतः परिणाम्युपादनकारणमज्ञानमिति मन्यते। अज्ञानं चानादि ,अनिर्वचनीयम्, त्रिगुणात्मकम्, ज्ञानविरोधिभावरूपञ्चास्ति। अज्ञानहेतोः परमानन्दरूपोऽपि जीव आत्मानं संसारिणं सुखिनं दुःखिनञ्च मनुते। आत्मानात्मनोरितरेतराध्यासेऽप्यज्ञानमेव कारणम्। वेदान्तशास्त्रेषु मूलप्रकृतिमायाविद्यादिशब्दैः प्रतिपादितमज्ञानमनर्थहेत्विति शङ्कराचार्येण ब्रह्मसूत्राध्यासभाष्ये सूचितमस्ति। सच्चेन्न बाध्येत,असच्चेन्न प्रतीयेत,बाध्यते प्रतीयते अत एवास्यानिर्वचनीयत्वमपि सुनिश्चितं भवति। यतो वा इमानि भूतानीत्यादिश्रुत्या निर्दिष्टा जगत्सृष्टिरप्यज्ञानभूमावेव वर्तते। यद्यज्ञानं नाभविष्यत् तर्हि जगत्कल्पनमेव नासेत्स्यत्। अत एव मायाविन इन्द्रजालशक्तिरिवाज्ञानस्यापि काचिच्छक्तिरस्तीति सिद्धान्तितं भवति। मयाध्यक्षेण प्रकृतिः सूयते स चराचरमितिस्मृतिरपि परमात्मनः प्रेरकत्वेऽज्ञानादेव जगत्सर्जनं निर्दिशति। त्रिगुणात्मकस्य जगतः कल्पकं त्रिगुणात्मकमनिर्वचनीयञ्चाज्ञानं जगतः परिणाम्युपादानं वर्तत इति वेदान्तसिद्धान्तः।

## सन्दर्भग्रन्थाः

ईशावास्योपनिषद् , गीताप्रेस ।
ऐतरेयोपनिषद् , गीताप्रेस ।
गिरिः, रामानन्द, (वि.सं २०७३), ईशादि दश उपनिषद् , महेश संस्कृत गुरुकुल।
चित्सुखाचार्यः,(वि.सं. २०४४),तत्त्वप्रदीपिका, हनुमानदास (सम्पा.), चौखम्बा संस्कृतसंस्थान।
छान्दोग्योपनिषद्,(वि.सं. २०५५),नवम संस्करण, गीताप्रेस।
तैत्तिरीयोपनिषद्, गीताप्रेस।
धर्मराजाध्वरीन्द्रः,(१९६३),*वेदान्तपरिभाषा,* गजानन शास्त्री (व्याख्या), चौखम्बा विद्याभवन।
प्रकाशानन्दः, (१९३६), *वेदान्तसिद्धान्तमुक्तावली,* अच्युतग्रन्थमाला कार्यालय।
प्रकाशात्मा, (सन् १९५८)*पञ्चपादिकाविवरणम्,* भारतीविजयम् प्रेस; मद्रास।
भट्टः, नागेशः, ( सन् १९४१)*परमलघुमञ्जूषा,* हितचिन्तक प्रेस।
यजुर्वेदः, (वि.सं. १९९९), वैदिक यन्त्रालय।
योगी सत्यभूषण, (सन् १९८५), *निघण्टुः,* मोतीलाल बनारसी दास।
विमुक्तात्मा, (ई. १९९३) *इष्टसिद्धिः,*एम् हिरयन्ना (सम्पा.), ओरियन्टल इन्स्टिच्युट।
विद्यारण्यमुनिः,(ई. १९९६),*विवरणप्रमेयसङ्ग्रहः,*कृष्णपन्त शास्त्री (सम्पा.),वाराणसी : अच्युतग्रन्थमाला।
व्यासः, ब्रह्मानन्दः,*वाक्यसुधा,* विद्याविलास प्रेस।
व्या. हनुमानदास,(ई.२००३) *ब्रह्मसूत्रशाङ्करभाष्यम्,*चौखम्बाविद्याभवन।
शङ्कराचार्यः, (वि.सं. २०४०)*विवेकचूडामणिः,* मनोहरलाल (व्याख्या.) द्वितीय संस्करण ।
शङ्कराचार्यः , आत्मबोधः।
शङ्कराचार्यः,(ई. १९३८) *उपदेशसाहस्री,* गजानन शास्त्री(सम्पा.) , महेश अनुसन्धान संस्थान।
श्रीमद्भगवद्गीता, (वि.सं.२०८०), महेश-संस्कृत-गुरुकुलम्।
सदानन्दः , (ई. १९९८)वेदान्तसारः, रमाशङ्कर त्रिपाठा (व्याख्या), षष्ठ संस्करण , चौखम्बा पब्लिसर्स, ।
सरस्वती,मधुसूदनः, (ई.१९७८)*न्यायामृतद्वैतसिद्धिः,*योगीन्द्रानन्द सरस्वती (सम्पा.), षड्दर्शन प्रकाशन , ।
व्यासः, (वि.सं. २००१)*अथर्ववेदसंहिता,*सम्पा. सातवलेकर दामोदर, स्वाध्यायमण्डल।
व्यासः, (सन् १९९७) *ऋग्वेदसंहिता,*सम्पा. सातवलेकर दामोदर, स्वाध्यायमण्डल।
सर्वज्ञात्ममुनिः, (ई.२००७)*सङ्क्षेपशारीरकम्,*दिव्यान्द गिरि (अनु.),चौखम्बा संस्कृत प्रतिष्ठान ।
सुरेश्वराचार्यः, (ई. १९९२) *बृहदारण्यकभाष्यवार्तिकम्,* आनन्दाश्रम संस्कृत सिरिज , ।
सुरेश्वराचार्यः, सन् १९२५, *नैष्कर्म्यसिद्धिः,*ओरिएन्टल रिसर्च।